Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# नरकाः



**डॉ.सुधांशुशेखरमहापात्रः,**
**सहायकाचार्यः, धर्मशास्त्रविभागः,**
**राष्ट्रीयसंस्कृतविश्वविद्यालयः,**
**तिरुपतिः, आन्ध्रप्रदेशः**

**सारांशः –** पुराणदृष्ट्या चतुर्दशभुवनानां मध्यस्थलोऽर्थाद् भूलोकस्याधस्ताद-तलस्योपरिष्टाच्च नरकाणां स्थानानि कल्पितानि। मर्त्यलोके पुण्यमर्जयन्तः स्वर्गम्, पापञ्च कुर्वाणा नरकान् प्राप्नुवन्ति। तत्र प्रामुख्येन एकविंशति नरकाः विषये स्मृतिकाराः उल्लिख्यन्ते। अत्र मया मनुस्मृतिः दृष्ट्या एकविंशति नरकाणां विषये संक्षेपेण आलोच्यते। ]

**मुख्यशब्दः –** नरकाः, स्वर्गम्, स्मृतिकाराः, मनुस्मृतिः, ऊर्ध्वलोकाः।

---

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये इति [i]मनुवचनात् पापमाचरतः किन्तु प्रायश्चित्तमकुर्वतः प्रत्यवायस्मरणात् प्रायश्चित्तस्यावश्यकर्त्तव्यता बोध्यते। ये पापिनोऽकृतप्रायश्चिता अपश्चात्तापिनस्ते दारुणान्नरकान् प्राप्नुवन्तीति [ii]याज्ञवल्क्येन प्रत्यपादि। तद्यथा-

**प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः।**
**अपश्चात्तापिनः कष्टान्नरकान् यान्ति दारुणान्।। इति।।**

ते च नरकाः क्व सन्ति, के च ते, कीदृशञ्च तेषां स्वरूपमिति संक्षेपेणात्रोच्यते। पुराणदृष्ट्या परिकल्पितेषु चतुर्दशभुवनेषु भूलोक-भुवलोक-स्वर्लोक-महर्लोक-जनलोक-तपोलोक-सत्यलोक इति सप्त ऊर्ध्वलोकाः, अतल-वितल-सुतल-तलातल-रसातल-महातल-पातालख्याः सप्ताधोलोका निर्द्दिष्टाः। तेषु भूलोको मध्यलोको मर्त्यलोको वोच्यते यत्र वयं निवसामः। तत्रापि यावद् वायुः प्रवाति, यावच्च मेघाः सन्ति यावच्च पक्षिण उत्पतन्ति, तावद् भूलोक इत्याख्यायते। तदूर्ध्वं भुवादिलोकास्तदधश्चातलादयो विराजन्ते। तत्र भूलोके मनुष्यपशुपक्षिप्रभृतयः भुवलोके यक्षोरक्षः भूतप्रेत-पिशाच-गन्धर्व-किन्नर-विद्याधरगणाः, स्वर्लोकस्योत्तरदिशि इन्द्रादि देवगणाः दक्षिणदिशि च पितृगणाः, महर्लोके क्रतु-पुलह-वसिष्ठ-ध्रुवादिऋषयः,

जनलोके जीवस्रष्टा प्रजापतिर्ब्रह्मा, तपोलोके भगवान् शिवः, सत्यलोके च गोलोकविहारी भगवान् विष्णुर्विराजते। एवञ्चाधोलोकेषु विलस्वर्गेषु क्रमेण अतले दुर्द्दान्तो मयपुत्रोऽसुरो बलः, वितले हाटकेश्वरः, सुतले विरोचनपुत्रो दैत्यराजो बली, तलातले मयदानवः, रसातले निवातकवचदानवाः, महातले कुहकतक्षककालियशुषेणादिनागाः, पाताले च नागलोकाधिपो वासुकी शङ्खचूडादिनागाश्च निवसन्ति।

एवं चतुर्दशभुवनानां मध्यस्थलोऽर्थाद् भूलोकस्याधस्तादतलस्योपरिष्टाच्च नरकाणां स्थानानि कल्पितानि। मर्त्यलोके पुण्यमर्जयन्तः स्वर्गम्, पापञ्च कुर्वाणा नरकान् प्राप्नुवन्ति। एते नरका के इति वीक्षायामेकविंशतिनरका [iii]मनुना प्रतिपादिताः। ते यथा-

**तामिस्रमन्धतामिस्रं महारौरवरौरवौ।**
**नरकं कालसूत्रञ्च महानरकमेव च।।**
**सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्।**
**सङ्घातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकम्।।**
**लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्।**
**असिपत्रवनञ्चैव लोहदारकमेव च।। इति।।**

एतेषु एकविंशतिसंख्यकेषु महारौरव-महावीचि-ऋजीष-पथ-नदी-लोहदारक-संज्ञकान् षण्णरकान् याज्ञवल्क्यो नाङ्गीकृत्य तत्परिवर्ते लोहितोह-सविष-महानिरय-महापथाऽवीचि-कुम्भीपाकसंज्ञकान् नरकान् प्रतिपादयति। अत्रापि स्वरूपदृष्ट्या मनूक्तं महारौरवं याज्ञोवल्क्योक्तमहानिरये मनूक्तं पन्थानञ्च याज्ञवल्क्योक्तमहापथेऽन्तर्भावयितुं शक्यते। नत्वन्येषामतीव परस्परं विलक्षणदर्शनात्। श्रीमद्भागवतेऽपि अष्टाविंशतिसंख्यका नरका वर्णिताः। तेषु केवलं दशसंख्यकनरकाणां साम्यं मनुयाज्ञवल्क्योक्तेषु नरकेषु दृश्यते। अवशिष्टाश्च सूकरमुखः, अन्धकूपः, कृमिभोजनः, सन्दंशः, तप्तसूर्मी, पूयोदः, प्राणरोधः, विशसनः, लालाभक्षः, सारमेयादनः, अयःपानः, क्षारकर्दमः, रक्षोगणभोजनः, शूलप्रोतः, दन्दशूकः, अवटनिरोधनः, पर्यावर्त्तनः, सूचीमुख इत्यादिसंज्ञका नरकाः [iv]श्रीमद्भागवते प्रतिपादिताः। एतेषु नरकेषु मनूक्तानां नरकाणां स्वरूपं संक्षेपेणालोच्यते।

1)तामिस्रः- भागवतेऽपि नरकोऽयं प्रथमत्वेनोपस्थापितः। अन्धकारमयोऽयं नरकः। परस्य वित्तापत्यकलत्राणामपहर्त्ता नरकेऽस्मिन् पतति। अत्र भोजनपानरहितो दण्डताडनसन्तर्जनादियातनाभिः पीड्यमानो जन्तुः कष्टमाप्नोति मूर्च्छामुपयाति च।

2)अन्धतामिस्रः – निविडान्धकारमयोऽयं नरकः। भागवतेऽप्ययं वर्णितोऽस्ति। यः पुरुषं वञ्चयित्वा तद्दारानुपभुङ्क्ते स एतादृशं नरकमाप्नोति।

3)महारौरवः – महान् रौद्रो रवो यत्र स महारौरवः। तप्तभूमिवर्त्मबहुलात्मकदेशोऽयं नरकः। यत्र जीवाः क्रव्यन्नामकैः रुरुभिः पीड्यन्ते। द्रव्यापहारिणः, गुरुदारापहारकाश्च महारौरवे पतन्ति। नरकोऽयं भागवतेऽपि वर्णितः।

4)रौरवः – श्रीमद्भागवते, मार्कण्डेयपुराणादिषु चास्य नरकस्य स्वरूपं वर्णितम्। मर्त्यलोके विहिंसिता जन्तवो यत्र भूत्वा तमेव विहिंसन्ति स नरको रौरव इति कथ्यते। रुरुः सर्पादपि क्रूरतरजन्तुरूपेण प्रतिपादितः। प्रसङ्गेऽस्मिन् प्रतिपादितं [v]देवीभागवते यथा-

**इहलोकेऽमुना ये तु हिंसिता जन्तवः पुरा।**
**त एव रुरवो भूत्वा परत्र पीडयन्ति तम्॥**
**तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः।**
**रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः॥ इति॥**

यः प्राणिहिंसनेन स्वकुटुम्बपोषणं करोति स एव नरकेऽस्मिन् पतति। द्विसहस्रयोजनपरिमिताग्निमयभूप्रदेशो यत्र यमदूतैः पापिनो निक्षिप्यन्ते स एव रौरवनरक इति।

5)कालसूत्रम्- कुलालचक्रसूत्रच्छेदनरूपमिति [vi]प्रायश्चित्तविवेके शूलपाणिना प्रतिपादितम्। कालस्य नाम यमस्य सूत्रं नाम पाश इव बन्धनहेतुर्यत्र स नरकः कालसूत्रसंज्ञकः। पितृब्राह्मणानां द्रोहकर्त्ताऽयुतयोजनपरिमण्डले ताम्रमये तप्तखले क्षुत्पिपासाभ्यां पीड्यमानः सूर्याग्नितापाभ्यां तप्यमानो यत्र वर्त्तते स नरकः कालसूत्रमिति। भागवतेऽस्य वर्णनाप्यस्ति।

6)महानरकम्- यत्र महती सर्वप्रकारका पीडेति शूलपाणिः। भगवतकारेण नरकोऽयं न स्वीकृतः। अतिशयनानाप्रकारकयातनाप्रदो यो नरकः स महानरक इत्युच्यते।

7)सञ्जीवनम्- यत्र संजीव्य पुनर्व्यापाद्यते सः। अस्य स्वरूपं स्पष्टतया न ज्ञायते। भागवतकारेणास्य नरकस्य नाम नोत्थापितम्।

8)महावीचिः – यत्र महाकल्लोलेन पापी लीयते स महावीचिरिति शूलपाणिः। याज्ञवल्क्येन भागवत्कारेण वा नरकोऽयं न गणितः। किन्तु अवीचिरिति कश्चन नरकस्ताभ्यां स्वीकृतः। तस्य स्वरूपन्तु इतो भिन्नम्। यत्र गिरिमूर्ध्नः अधः शिराः निपात्यते, न म्रीयमाणश्चेत् पुनर्निपात्यते सोऽवीचिरिति कथ्यते। साक्ष्येऽनृतं वदन् प्रेत्याऽस्मिन् नरके पतति।

9)तापनः – अग्न्यादिदाहात्मकं स्थानं यत्र सः। भागवतेऽस्य नाम नास्ति।

10)सम्प्रतापनः – यत्र सर्वतः तापः प्रदीयते सः। याज्ञवल्क्येनापि स्वीकृतोऽयम्। शूलपाणिना नरकोऽयं कुम्भीपाकत्वेन प्रतिपादितः। कुम्भीपाकस्य स्वरूपं भागवते वर्णितम्। तत्र कुम्भी नाम षडहमात्रकुटुम्बभरणपर्याप्तधान्यं यस्मिन् मृद्भाण्डे स्थापयितुं शक्यते तादृशपात्रविशेषः। ताञ्च कुम्भीं तैलपूर्णं कृत्वा तच्च तैलमग्निवर्णं कृत्वा तत्र पापिनं निक्षिप्यते यथा तस्य तप्ततैलेन पाकः स्यात्। नरकोऽयमतिभयङ्करः।

11)सङ्घातः – अत्यन्तसंवृत्तदेशे बहूनामवस्थानं यत्र सः। नरकोऽयं भागवते न वर्णितः।

12)काकोलम्- यत्र काकैः लौहचञ्चवा संपीड्य भुज्यते।

13)कुड्मलम्- यत्र रज्जुभिरुद्बन्धनद्वारा पीड्यते।

14)पूतिमृत्तिकम्- यत्र पुरीषगन्धिमृत्तिका विद्यते।

15)लोहशङ्कुः- लौहशङ्कुनामुपरि यत्र चारणं कार्यते, येन च सूचीभेद्या पीडा भवति।

16)ऋजीषम्- पिष्टपचनप्रक्षेपो यत्रेति शूलपाणिः। उत्तप्तेः ऋजीषे पिष्टं यथा प्रक्षिप्यते, तथा यत्र जन्तुः प्रक्षिप्यते स नरकः।

17)पन्थाः – यत्र जन्तुर्भूयो भूयोऽटाय्यते सः। नरकोऽयं केवलं मनुना स्वीकृतः, न याज्ञवल्क्यादिभिः।

18)शाल्मली- यत्र शाल्मलीकण्टकैः पीड्यते सः। भागवतकारेण वज्रकण्टकशाल्मलीत्युक्तम्। अर्थात् यत्रजन्तुर्वज्रकण्टक-शाल्मलीमारोप्य चाकृष्यते सः।

19)नदी- नदी तप्तवैतरणीति कथ्यते। सा च नदी तप्ता दुर्गन्धा महावेगा अस्थिकेशरक्तपरिपूर्णा चेति वर्णिता। तत्र स्नानमात्रेण सर्वाङ्गं शरीरं दग्धीभूतं भवति। प्रसङ्गेऽस्मिन् [vii]प्रायश्चित्तविवेके शूलपाणिना जमदग्निवचनत्वेन प्रतिपादितं यत्-

**नदी वैतरणी नाम दुर्गन्धा रुधिरावहा।**
**उष्णतोया महावेगा अस्थिकेशतरङ्गिणी।। इति।।**

यत्र एवं भूतया नद्या अपह्वियते स नरकः नदीपदवाच्यः। भागवतकारेणापि प्रसङ्गेऽस्मिन्नुक्तं यत्- ये राजन्या राजपुरुषा वा धर्मसेतून् भिन्दन्ति, ते संपरेत्य वैतरण्यां निपतन्ति। ते च जलजन्तुभिः भक्ष्यमाणा विण्मूत्रपूयशोणितकेशास्थिमेदोमांसवसावाहिन्यां नद्यामुपताप्यन्ते।

20)असिपत्रवनम्- यत्र असिधारस्योपरि चारणं भवति सः। असिपत्रवनं नाम पत्रैर्यत्र विदार्यते इति शूलपाणिना समुद्धृतम्। भागवत्कारेणापि- यो निजवेदपथादनापदि चलितः राखण्डञ्चोपगतः तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति। तत्रेतस्ततः यदि धावमानो भवति, तर्हि उभयतो धारैस्तालवनासिपत्रैः च्छिद्यमानसर्वाङ्गः हा! हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपततीति।

21) लोहदारकम्- यत्र निगडादिना बन्धनं क्रियते, कारागारे च निक्षिप्यते सः।

एवं भागवत-मार्कण्डेयपुराण-विष्णुपुराणादिषु नरकान्तराणामपि वर्णितं स्वरूपं ज्ञातुं शक्यते। इति शम्।।

---

**सन्दर्भसूची**

i . मनुस्मृतिः- 11/5

ii . याज्ञवल्क्यस्मृतिः- 3/221

iii . मनुस्मृतिः- 4/88-90

iv . श्रीमद्भागवतम्- 5/26

v . देवीभागवतम्- 8/11

vi . प्रायश्चित्तविवेकः, पृष्ठा-19

**सन्दर्भग्रन्थसूची**


प्रायश्चित्तविवेकः –नारायण प्रेस, पुरी, 1982

मनुस्मृतिः – मन्वर्थमुक्तावलीसहिता, मोतिलाल वनारसीदास, दिल्ली, 1990

याज्ञवल्क्यस्मृतिः – मिताक्षराटीका सहिता, डा. गङ्गासागरराय सम्पादित, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।

श्रीमद्भागवतम् – गीताप्रेस, गोरखपुर, उत्तरप्रदेश।

देवीभागवतम् - गीताप्रेस, गोरखपुर, उत्तरप्रदेश।


vii . तत्रैव, पृष्ठा- 20